# Sarasvati Stuti 3

# સરસ્વતીસ્તુતિઃ ૩

## Document Information

Text title : Sarasvati Stuti 3)

File name : sarasvatIstutiH3.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : September 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# Sarasvati Stuti 3

# સરસ્વતીસ્તુતિઃ ૩

ૐ સિતવર્ણાલઙ્કારે સરસ્વતિ સમસ્તવાઙ્મયાધારે ! ।
કમલજમાનસવરટે મૃગાઙ્કધવલે નમસ્તુભ્યમ્ ॥ ૧॥

ધન્યઃ સ એવ લોકે સ એવ પૂજ્યઃ સ એવ સર્વગુરુઃ ।
યસ્ય મુખકમલકોશે વાઙ્મયા કુલદેવતે વસસિ ॥ ૨॥

કસ્ત્વાં વિના વિવેકી વિવેકવિકલસ્ય નિષ્ફલં જન્મ ।
તસ્માદ્ભારતિ ભવિનાં ત્વમેવ હેતુર્વિવેકેઽપિ ॥ ૩॥

લક્ષ્મીવાનપિ પુરુષઃ શૂરઃ સુભગોઽપિ કામસમરૂપઃ ।
વૃષ ઇવ વિબુધસભાયાં પ્રતિભાત્યમલે ત્વયા રહિતઃ ॥ ૪॥

મુનિમનુજમાનનીયો માતર્મૂર્ખોઽપિ માનવો દક્ષઃ ।
નિઃશેષશાસ્ત્રવક્તા ત્વન્મન્ત્રધ્યાનતો ભવતિ ॥ ૫॥

કુવલયદૃશઃ ક્વ તાવદ્વેશ્મનિ વિલસન્તિ કુચભરાનમ્રાઃ ।
યાવદસિતાબ્જનયને ન ત્વં તુષ્ટાસિ દેવિ ભુવિ ભવિનામ્ ॥ ૬॥

જિત્વા નરોરિરાજકમગગુરુગજવાજિપુરુષબલસહિતઃ ।
યદુપૈતિ તત્સમગ્રં ત્વચ્ચરણનુતેઃ ફલં તસ્ય ॥ ૭॥

આવર્જિતાપિ કષ્ટૈરિહ જન્મનિ મુઞ્ચતિ નરં શ્રીઃ ।
ન ત્વં સપ્તભવેષ્વિતિ મત્વા કો નૌતિ નો ભવતીમ્ ॥ ૮॥

કવિવરવદનસરોરુહવિહરણવિસ્રમ્ભવિભ્રમદ્ભ્રમરિ ।
ભગવતિ પઞ્ચમુખીશ્વરિ વાગીશ્વરિ નમસ્તેઽસ્તુ ॥ ૯॥

શમ્ભુપ્રણતાં વાણીં ભક્ત્યા યઃ સ્તૌતિ સોઽચિરેણૈવ ।
અવહિતબુદ્ધિપ્રસરઃ કવિરાજો જાયતે મનુજઃ ॥ ૧૦॥

ઇતિ સરસ્વતીસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Sarasvati Stuti 3*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*